CHAPTER-2

# वुद्धि: वलबति सदा

**QUESTION BANK**

१.    **अधोलिखितगद्यांशान् पठित्वा तदाधारितनां प्रश्ननानाम् उत्तराणि लिखत –**

अस्ति देउलाख्यो ग्राम: । तत्र राजसिंह: नाम राजपुत्र: वसति स्म । एकदा केनापि आवश्यककार्येण तस्य भार्या बुद्धिमती पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता । मार्गे गहनकानने सा एकं व्याघ्रं ददर्श । सा व्याघ्रमागच्छन्तं दृष्ट्वा धाष्ट्यात् पुत्रौ चपटेया प्रहृत्य जगाद - ''कथमेकैकशो व्याघ्रभक्षणाय कलहं कुरुथ:? अयमेकस्तावद्विभज्य भुज्यताम् । पश्चाद् अन्यो द्वितीय: कश्चिल्लक्ष्यते ।''

I.    एकपदेन उत्तरत –    **[1/2 x 2 = 1]**

(i) राजसिंह: कुत्र वसति स्म ?

(ii) राजसिंह: क: आसीत् ?

(iii) सा बुद्धिमती कुत्र एकं व्याघ्रं ददर्श ?

(iv) बुद्धिमती पुत्रद्वयोपेता कुत्र चलिता ?

II.    पूर्णवाक्येन उत्तरत –    **[1 x 2 = 2]**

(i) सा पुत्रौ चपेटया प्रहृत्य किम् जगाद ?

(ii) सा पुत्रौ कथम् चपेटया प्रहृत्य जगाद ?

III.    भाषिककार्यम् –    **[1/2 x 4 = 2]**

(i) 'जगाद' इति क्रियापदस्य कर्तृपदं किम् ?

(ii) 'अयम्' इति पदं कस्मै प्रयुक्तम् ?

(iii) 'भार्या' इति पदस्य विशेषणपदं किम् ?

(iii) 'गच्छन्तम्' इति क्रियापदस्य विपर्ययपदं गद्यांशे किम् ?

२. **इति श्रुत्वा व्याघ्रमारी काचिदियमिति मत्वा व्याघ्रो भयाकुलचितो नष्टः ।**

निजबुद्ध्या विमुक्ता सा भयाद् व्याघ्रस्य भामिनी ।

अन्योऽपि बुद्धिमाँल्लोके मुच्यते महतो भयात् ।।

भयाकुलं व्याघ्रं दृष्ट्वा कश्चित् धूर्तः श्रृगालः हसन्नाह - 'भवान् कुतः भयात् पलायितः ?'

व्याघ्रः – गच्छ, गच्छ जम्बुक ! त्वमपि किञ्चिद् गूढप्रदेशम् । यतो व्याघ्रमारीति या शास्त्रे श्रूयते तयाहं हन्तुमारब्ध परं गृहीतकरजीवितो नष्टः शीघ्रं तदग्रतः ।

श्रृगालः – व्याघ्र ! त्वया महत्कौतुकम् आवेदितं यन्मानुषादपि बिभेषि ?

व्याघ्रः – प्रत्यक्षमेव मया सात्मपुत्रावेकैकशो मामत्तुं कलहायमानौ चपेटया प्रहरन्ती दृष्टा ।

I. एकपदेन उत्तरत – **[1/2 x 2 = 1]**

(i) कीदृशः व्याघ्रः नष्टः ?

(ii) श्रृगालः किं कुर्वन् आह ?

(iii) कं दृष्ट्वा श्रृगालः अवदत् ?

(iv) श्रृगालः कीदृशः आसीत् ?

II. पूर्णवाक्येन उत्तरत – **[1 x 2 = 2]**

(i) व्याघ्रः जम्बुकं प्रति किं कथयति ?

(ii) श्रृगालः व्याघ्रं प्रति किं प्राह ?

III. भाषिककार्यम् – **[1/2 x 4 = 2]**

(i) 'जम्बुकः' इति पदस्य पर्यायपदं गद्यांशे किमस्ति ?

(ii) 'श्रृगालः' इति पदस्य विशेषणपदं गद्यांशे किं प्रयुक्तम् ?

(iii) 'आह' इति क्रियापदस्य कर्तृपदं किम् ?

(iii) 'रुदन् ' इति पदस्य विपर्ययपदं गद्यांशे किम् ?

३. जम्बुक: – स्वामिन्! यत्रास्ते सा धूर्ता तत्र गम्यताम् । व्याघ्र! तव पुन: तत्र गतस्य सा सम्मुखमपीक्षते यदि, तर्हि त्वया अहं हन्तव्य: इति ।

व्याघ्र: – श्रृगाल! यदि त्वं मां मुक्त्वा यासि तदा वेलाप्यवेला स्यात् ।

जम्बुक: - यदि एवं तर्हि मां निजगले बद्ध्वा चल सत्वरम् । स व्याघ्र: तथाकृत्वा काननं ययौ । श्रृगालेन सहितं पुनरायान्तं व्याघ्रं दूरात् दृष्ट्वा बुद्धिमती चिन्तितवती – जम्बुककृतोत्साहाद् व्याघ्रात् कथं मुच्यताम्? परं प्रत्युत्पन्नमति: सा जम्बुकमाक्षिपन्त्यङ्गुल्या तर्जयन्त्युवाच –

रे रे धूर्त त्वया दत्तं मह्यं व्याघ्रत्रयं पुरा ।

विश्वास्याद्यैकमानीय कथं यासि वदाधुना ।।

I. एकपदेन उत्तरत – **[1/2 x 2 = 1]**

(i) व्याघ्रजम्बुकौ कुत्र ययौ ?

(ii) ''त्वया अहं हन्तव्य:'' इति क: कथयति ?

II. पूर्णवाक्येन उत्तरत – **[1 x 2 = 2]**

(i) सा बुद्धिमती किं चिन्तितवती ?

(ii) व्याघ्र: जम्बुकं किम् अवदत् ?

III. भाषिककार्यम् – **[1/2 x 4 = 2]**

(i) 'शीघ्रम्' इति पदस्य पर्यायपदं गद्यांशे किमस्ति ?

क) बद्ध्वा ख) माम् ग) सत्वरम् घ) दूरात्

(ii) 'बद्ध्वा' इति पदस्य विपर्ययपदं गद्यांशे किम् ?

क) मुक्तवा ख) यासि ग) तर्हि घ) कृत्वा

(iii) 'सा धूर्ता' अत्र विशेषणपदं किम् ?

क) सा ख) धूर्ता ग) तत्र घ) त्वया

ODM EDUCATIONAL GROUP Changing your Tomorrow

(iv) 'चिन्तितवती' इति क्रियापदस्य कर्तृपदं किम्?

क) सा ख) बुद्धिमती ग) कथम् घ) तर्जन्ती

**४. अधोलिखितश्लोकानां अन्वयं मञ्जूषात: उचितं पदं चित्वा पूरयत –**

क) निजबुद्ध्या विमुक्ता सा भयाद् व्याघ्रस्य भामिनी ।

अन्योऽपि बुद्धिमाँल्लोके मुच्यते महतो भयात् ।।

अन्वय: – सा भामिनी निज (i)...........व्याघ्रस्य भयात् (ii) .............लोके अन्य: अपि (iii)......... (निजबुद्धध्या) महतो (iv) ..........मुच्यते ।

मञ्जूषा : भयात्, बुद्ध्या, बुद्धिमान्, विमुक्ता

ख) रे रे धूर्त त्वया दत्तं मह्यं व्याघ्रत्रयं पुरा ।

विश्वास्याद्यैकमानीय कथं यासि वदाधुना ।।

अन्वय: – रे रे धूर्त! पुरा त्वया (i)......... व्याघ्र (ii)..........दत्तम् । विश्वास्य (अपि) अद्य (iii) ...........आनीय कथं यासि इति अधुना (iv) ..........।

मञ्जूषा : मह्यम्, त्रयम्, वद, एकम्

ग) इत्युक्त्वा धाविता तूर्णं व्याघ्रमारी भयङ्करा ।

व्याघ्रोऽपि सहसा नष्ट: गलबद्धश्रृगालक: ।।

अन्वय: – इत्युक्त्वा (i) ........ व्याघ्रमारी (ii) ......... धाविता । गलबद्धश्रृगालक: (iii) ....... अपि (iv) ............. नष्ट: ।

मञ्जूषा : व्याघ्र:, भयङ्करा, सहसा, तूर्णम्

**५. अधोलिखितश्लोकान् पठित्वा तेषां भावार्थं पूरयत् –**

क) निजबुद्ध्या विमुक्ता सा भयाद् व्याघ्रस्य भामिनी ।

अन्योऽपि बुद्धिमाँल्लोके मुच्यते महतो भयात् ।।

भावार्थ: – यथा सा रूपवती स्त्री निज (i) …….. प्रभावेण व्याघ्रस्य (ii) ……… विमुक्ता अभवत् तथैव अस्मिन् संसारे य: (iii) …….. भवति अर्थात् य: बुद्धे: (iv) ……..करोति स: अपि महतो भयात् मुच्यते ।

मञ्जूषा – बुद्धिमान्, भयात्, उपयोगम्, बुद्धे:

ख) रे रे धूर्त त्वया दत्तं मह्यं व्याघ्रत्रयं पुरा ।

विश्वास्याद्यैकमानीय कथं यासि वदाधुना ।।

भावार्थ: – रूपवती बुद्धिमती च स्त्री स्वपुत्रौ नीत्वा मार्गे आगन्तं (i) …….. दृष्ट्वा अतीव (ii) ……… अवदत् यत् रे दुष्ट श्रृगाल! त्वया पूर्वं मह्यं (iii) …….. सिंहा: आनीता: परं सम्प्रति कथमेक: एष (iv) …….. इति कथय ।

मञ्जूषा – त्रय:, श्रृगालम्, आनीत:, क्रोधेन

ग) इत्युक्त्वा धाविता तूर्णं व्याघ्रमारी भयङ्करा ।

व्याघ्रोऽपि सहसा नष्ट: गलबद्धश्रृगालक: ।।

भावार्थ: – व्याघ्रं प्रति संकेतेन कथयित्वा सा (i) …….. शीघ्रम् अधावत् । स: (ii) ……… अपि तस्या: वचनं श्रुता तक्षेणन तेन (iii) …….. श्रृगालेन सह (iv) …….. अभवत् ।

मञ्जूषा- गलबद्धेन, नष्ट:, व्याघ्रमारी, व्याघ्र:

घ) बुद्धिर्बलवती तन्वि सर्वकार्येषु सर्वदा ।

भावार्थ: – अस्य भावोऽस्ति यत् अस्मिन् संसार सर्वेषु कार्येषु सर्वेषु (i) …….. च बुद्धि: एव बलयुक्ता भवति । (ii) ……… बलस्य अग्रे कस्यापि (iii) …….. कदापि न तिष्ठति । अनेन एव जन: (iv) …….. पूरयितुम् शक्नोति ।

मञ्जूषा- बलम्, कालेषु, स्वकामना:, बुद्धे:

**६. अधोलिखितवाक्येषु रेखाङ्कितादानि आधृत्य प्रश्ननिर्माणं कुरुत –**

ODM EDUCATIONAL GROUP
Changing your Tomorrow

क) बुद्धिमती <u>पितुर्गृहं</u> प्रति चलिता ।

ख) सा <u>धाष्ट्र्यात्</u> पुत्रौ चपेटया जगाद ।

ग) मार्गे सा एकं <u>व्याघ्रं</u> ददर्श ।

घ) <u>सा</u> व्याघ्रमागच्छन्तं दृष्ट्वा उवाच ।

ङ) <u>व्याघ्रमारी</u> काचिदियमिति मत्वा भयाकुलचित्तो नष्टः ।

च) कश्चित् <u>धूर्तः</u> श्रृगालः हसन् आह ।

छ) गच्छ, जम्बुक! किञ्चिद् <u>गूढप्रदेशम्</u> ।

ज) त्वं <u>मानुषात्</u> अपि बिभेषि ?

झ) कथम् एकैकशो <u>व्याघ्रभक्षणाय</u> कलहं कुरुथः ?

ञ) माम् <u>निजगले</u> बद्ध्वा चल सत्वरम् ।

ट) परं <u>प्रत्युत्पन्नमतिः</u> सा जम्बुकम् उवाच ।

i) कीदृशः ii) कीदृशी iii) का iv) कः

ठ) पुरा <u>त्वया</u> मह्यं व्याघ्रत्रयं दत्तम् ।

i) कस्मात् ii) केन iii) कस्यै iv) कस्मै

ड) व्याघ्रः <u>श्रृगालेन</u> सहितं पुनः आगच्छत् ।

i) कम् ii) कस्मात् iii) कथम् iv) केन

ढ) <u>देउलाख्यो ग्रामे</u> राजसिंहः वसति स्म ।

i) कस्मिन्/कुत्र ii) कीदृशे iii) क्योः iv) के

ण) तत्र राजसिंहः नाम <u>राजपुत्रः</u> वसति स्म ।

i) कुत्र ii) यत्र iii) कस्मिन् iv) कः

७. **निम्नलिखितानि वाक्यानि कथाक्रमानुसारं संयोज्य पुनः लिखत –**

१.क) बुद्धिर्बलवती तन्वि सर्वकार्येषु सर्वदा ।

ODM EDUCATIONAL GROUP Changing your Tomorrow

ख) तस्य भार्या बुद्धिमती आसीत् ।

ग) मार्गे सा एकं व्याघ्रं ददर्श ।

घ) बुद्धिमती व्याघ्रजाद् भयात् पुनरपि मुक्ताऽभवत् ।

ङ) राजसिंहः नाम राजपुत्रः वसति स्म ।

च) अस्ति देउलाख्यो नाम ग्रामः ।

छ) सा पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता ।

ज) सा धाष्ट्र्यात् पुत्रौ चपेटया प्रहृत्य जगाद ।

२. क) कथम् एकैकशः व्याघ्रभक्षणाय कलहं कुरुथः ?

ख) कश्चित् धूर्तः श्रृगालः हसन् अवदत् ।

ग) त्वं मानुषादपि बिभेषि ।

घ) तस्य भार्या बुद्धिमती पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता ।

ङ) भवान् कुतः भयात् पलायितः ?

च) तौ एव विभज्य भुज्यताम् ।

छ) व्याघ्रः भयाकुलचित्तो नष्टः ।

ज) बुद्धिमती व्याघ्रजाद् भयात् पुनरपि मुक्ताऽभवत् ।

ODM EDUCATIONAL GROUP Changing your Tomorrow

८. **अधोप्रदत्तपर्यायपदानाम् उचितं मेलनं कुरुत –**

| **खण्डः 'क'** | **खण्डः 'ख'** |
|---|---|
| शीघ्रम् | अवलोक्य |
| उच्यते | मत्या |
| जगाद | अवदत् |
| ददर्श | उत्सुकता |
| पुरा | खादितुम् |

| | |
|---|---|
| सत्वरम् | भार्या |
| कौतुकम् | पश्यति |
| दृष्ट्वा | कथ्यते |
| ययौ | दृष्टवान् |
| बुद्ध्या | गतवान् |
| वनम् | सत्वरम् |
| पत्नी | शीघ्रम् |
| ईक्षते | प्राचीनकाले |
| अत्तुम् | आक्षेपं कुर्वन्ती |
| आक्षिपन्ती | काननम् |

९. **अधोप्रदत्तविपर्ययपदानाम् उचितं मेलनं कुरुत –**

| **खण्ड: ‘क‘** | **खण्ड: ‘ख‘** |
|---|---|
| अत्तुम् | पति: |
| बध्यते | बुद्धिमान् |
| पुरा | मुक्त्वा |
| वनम् | गृहम् |
| पत्नी | आगच्छसि |
| गच्छसि | भवति |
| बद्ध्वा | अधुना |
| सत्वरम् | पृष्ठत: |
| दूरात् | समीपात् |
| बुद्धिमती | पातुम् |
| भवान् | शनै:-शनै: |
| अग्रत: | मुच्यते |

◆◆◆

ODM EDUCATIONAL GROUP Changing your Tomorrow